# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – आचार्य – १ | प्रश्नपत्रम् – २ | गुणाः – ५० |
| विषयः – धर्मशास्त्रम् | सत्रम् – २ | समयः – २ तः ४ |
| दिनाङ्कः – १४/०७/२०२१ | सन्दर्भग्रन्थः – निर्णयसिन्धुः (प्रथमपरिच्छेदे नियतांशः) | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत ।**

१ चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत् ।
आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकम् ॥

२ दशम्यैकादशी विद्धा द्वादशी च क्षयं गता ।
क्षीणा सा द्वादशी ज्ञेया नक्तं तु गृहिणः स्मृतम् ॥

३ भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा ।
पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतुपकालिकी ॥

४ एवमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्व वासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥

**प्रश्नः २** वैष्णवैः कीदृगेकादशीव्रतं कार्यम् ? शास्त्रसम्मतं विनिर्दिशत ।

**प्रश्नः ३** द्वादश्यां के पदार्थाः भोजने वर्ज्याः ? कथम् ? स्पष्टयत ।

**प्रश्नः ४** वैश्वदेवाकरणे किं प्रायश्चित्तं कर्तव्यम् ? सविस्तृतं निरूपयत ।

**प्रश्नः ५** 'निर्णयसिन्धुग्रन्थस्य साम्प्रतसमये महत्त्वं' विषयमिमं स्पष्टयत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते ।
मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते ॥

२ सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना ॥

३ यस्यां सन्ध्याशतः सोमो मृणालमिव दृश्यते ।
अपराह्णे क्षयस्तस्यां पिण्डानां करणं ध्रुवम् ॥

४ आरनालं पयस्तक्रं दधिस्नेहाज्यपाचितम् ।
मणिकस्थोदकं चैव न दूष्येद्राहुसूतके ॥

प्रश्नः ७ ग्रहणे कर्तव्याकर्तव्यकर्म निरूपणं यथाग्रन्थं कुरुत ।

प्रश्नः ८ पतितान्नभोजने किं प्रायश्चित्तं ? वर्णयत ।

प्रश्नः ९ ग्रहणे तीर्थादिषु स्नानादिकरणे किं फलम् ? वर्णयत ।

प्रश्नः १० नित्यतर्पणप्रयोगे कर्तव्यकर्मणां विवेचनं कुरुत ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ निर्णयसिन्धौ कति परिच्छेदाः सन्ति ?
२ निर्णयसिन्धुग्रन्थस्य कर्तुः नाम किम् ?
३ खण्डपर्वणि पूर्वदिने किं कर्तव्यम् ?
४ खण्डपर्वणि परदिने किं कर्तव्यम् ?
५ चन्द्रग्रहणे कियत्कालपर्यन्तं न भोक्तव्यम् ?
६ सूर्यग्रहणे कियत्कालपर्यन्तं न भोक्तव्यम् ?
७ आदित्येहनि सङ्क्रान्तौ ग्रहणे चन्द्रसूर्ययोः किं न कर्तव्यम् ?
८ निर्णयसिन्धुशब्दे कः समासः ?
९ धर्मशब्दस्य कोऽर्थः ?
१० मासाः कति सन्ति ?
११ तिथयः कति सन्ति ?
१२ पक्षाः कति सन्ति ?
१३ अधिकमासस्य अपरं नाम किम् ?
१४ पुरुषार्थाः कति सन्ति ?
१५ आश्रमाः कति सन्ति ?

****